दुष्कृतं यच्च मे किञ्चिद्वाङ्मनःकायकर्म्मभिः ॥
पुनातु मे तदिन्द्रस्तु वरुणः सबृहस्पतिः ।
सविता च भगश्चैव मुनयः सनकादयः ॥
आब्रह्मस्तम्बपर्य्यन्तं जगत् तृप्यत्विति ब्रुवन् ।
क्षिपेदपोऽञ्जलींस्त्रींस्तु कुर्व्वन् सङ्क्षेपतर्पणम् ॥”
इति गारुडे २१५ अध्यायः ॥

तर्पणविशेषस्तु गारुडे २१८ अध्याये तथा वह्निपुराणे नित्याह्निकस्नानविधिनामाध्याये च द्रष्टव्यः ॥ * ॥ जीवत्पितृकस्य तर्पणनिषेधो यथा,—
“दर्शस्नानं गयाश्राद्धं तिलैस्तर्पणमेव च ।
न जीवत्पितृको भूप ! कुर्य्यात् कृत्वाघमाप्नुयात् ॥”
इति कालिकापुराणे ८८ अध्यायः ॥

महायज्ञविशेषः । तत्तु पितृयज्ञः । पितॄणां कव्यजलादीनाञ्च विधिना जलान्नदानेन तृप्तिसम्पादनम् । इत्यमरटीकायां भरतः ॥ “तत् द्विविधं प्रधानं अङ्गञ्च । तत्राद्यं यथा,—
‘तर्पणञ्च शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः ।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥’
इति शातातपः ॥

विधवामधिकृत्य काशीखण्डे ।
‘तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः ।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्व्वकम् ॥’
द्वितीयं यथा, ब्रह्मपुराणे ।
‘नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम् ॥’
तर्पणाकरणे दोषः । यथा, योगियाज्ञवल्क्यः ।
‘नास्तिक्यभावाद्यश्चापि न तर्पयति वै सुतः ।
पिबन्ति देहरुधिरं पितरो वै जलार्थिनः ॥”
तस्य निषिद्धस्थानादि यथा । “नेष्टकारचिते स्थाने पितॄंस्तर्पयेत् ।’ इति शङ्खलिखितौ ॥
‘यन्न सर्व्वाय चोत्सृष्टं यच्चाभोज्यनिपानजम् ।
तद्वर्ज्यं सलिलं तात ! सदैव पितृकर्म्मणि ॥’
इति मार्कण्डेयपुराणम् ॥ * ॥

तस्य विधानं यथा । स्नातश्चार्द्रवासा देवपितृतर्पणमम्भःस्थ एव कुर्य्यात् परिवर्त्तितवासाश्चेत् तीरमुत्तीर्य्येति । इति विष्णुः ॥ तीर्थे विशेषो यथा, मत्स्यपुराणे ।
‘तिलोदकाञ्जलिर्द्देयो जलस्थैस्तीर्थवासिभिः ॥’
तीर्थं स्थलस्थश्चेत् तर्पणं करोति तदा जलैकचरणः आचम्य कुर्य्यात् तस्य जले च तर्पणमविरुद्धम् । स्थले तर्पणं दर्भेषु कार्य्यम् । यथा,—
‘प्रागग्रेषु सुरांस्तर्प्येत् मनुष्यांश्चैव मध्यतः ।
पितॄंश्च दक्षिणाग्रेषु दद्यादिति जलाञ्जलीन् ॥’
इति आग्नेयपुराणम् ॥

अशुचिदेशे तु ।
‘यत्राशुचिस्थलं वा स्यादुदके देवतापितॄन् ।
तर्पयेत्तु यथाकाममप्सु सर्व्वं प्रतिष्ठितम् ॥’
इति विष्णुः ॥
‘प्रादेशमात्रं उद्धृत्य सलिलं प्राङ्मुखः सुरान् ।
उदङ्मुखांस्तर्प्येत पितॄन् दक्षिणतस्तथा ॥’
इति दक्षः ॥

उद्धृतोदके तु ।
‘पात्राद्वा जलमादाय शुचौ पात्रान्तरे क्षिपेत् ।
जलपूर्णेऽथवा गर्त्ते न स्थले तु विवर्द्दिषि ॥’
इति हारीतः ॥
‘यद्युद्धृतैः प्रसिञ्चेत्तु तिलान् संमिश्रयेज्जले ।
अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः ॥’
इति योगियाज्ञवल्क्यः ॥
“अङ्गुष्ठानामिकाभ्याञ्च दक्षिणस्येतरात् करात् ।
तिलान् गृहीत्वा पात्रस्थान् ध्यायन् सन्तर्पयेत् पितॄन् ॥’
इति नारदः ॥ * ॥

देवतर्पणं यथा,—
‘ब्रह्माणं तर्पयेत् पूर्व्वं विष्णुं रुद्रं प्रजापतिम् ।
देवा यक्षास्तथा नागा गन्धर्व्वाप्सरसोऽसुराः ॥
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भकाः खगाः ।
विद्याधरा जलाधारास्तथैवाकाशगामिनः ॥
निराहाराश्च ये जीवाः पापे धर्म्मे रताश्च ये ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥’
इदं उपवीतिना प्राङ्मुखेन देवतीर्थेन कार्य्यम् ॥ मनुष्यतर्पणं यथा,—
‘सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥
सर्व्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ॥’
इदं निवीतिना मनुष्यतीर्थेन सामगेन प्रत्यङ्मुखेन कार्य्यम् । अन्यवेदिना उदङ्मुखेन कार्य्यम् ॥ * ॥ तत ऋषितर्पणं प्राङ्मुखेन उपवीतिना देवतीर्थेन कार्य्यम् । ततो दिव्यपितृतर्पणं दक्षिणामुखेन प्राचीनावीतिना सतिलजलेन पितृतीर्थेन कार्य्यम् । ततः पितृतर्पणम् ॥ * ॥ भीष्माष्टम्यां भीष्मतर्पणम् । तस्य मन्त्रो यथा,—
‘वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च ।
अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥’
प्रार्थनमन्त्रो यथा,—
‘भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥’
प्रेतचतुर्द्दश्यां यमतर्पणं यथा,—
‘यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औडुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥’
प्रत्येकनामभिस्त्रींस्त्रीनञ्जलीन् दद्यात् ॥ * ॥
तिलतर्पणनिषेधो यथा,—
‘रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे ।
सप्तम्यां जन्मदिवसे न कुर्य्यात् तिलतर्पणम् ॥’
इति स्मृतिः ॥
‘संक्रान्त्यां निशि सप्तम्यां रविशुक्रदिने तथा ।
श्राद्धे जन्मदिने चैव न कुर्य्यात्तिलतर्पणम् ॥’
इति मत्स्यपुराणम् ॥
तत्र प्रतिप्रसवो यथा,—
‘अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च ।
उपाकर्म्मणि चोत्सर्गे युगादौ मृतवासरे ॥
सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे ।
तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्व्वदा ॥’
इति स्मृतिः ॥
‘तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलमिश्रितम् ॥’
इति मरीचिवचनम् ॥ * ॥
तिलाभावे प्रतिनिधिर्यथा ।
‘तिलानामप्यभावे तु सुवर्णरजतान्वितम् ।
तदभावेऽपि सिञ्चेत्तु दर्भैर्मन्त्रेण चाप्यथ ॥’
इति याज्ञवल्क्यः ॥ * ॥
अशक्तौ । आब्रह्मस्तम्बपर्य्यन्तं जगत्तृप्यतु । इत्यनेन त्रींस्तर्पयेत् ।” इत्याह्निकतत्त्वम् ॥
काशीखण्डमते तु ।
“आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु सर्व्वे पितरो मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥”* ॥
जन्माष्टम्यां तर्पणस्य फलं यथा,—
“तस्यां तिथौ वारिमात्रं पितॄणां यः प्रयच्छति ।
गयाश्राद्धं कृतं तेन शताब्दं नात्र संशयः ॥”
इतिब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

तर्पणी, स्त्री, (तृप्यतेऽनयेति । तृप + करणे ल्युट् । स्त्रियां ङीप् ।) गुरुस्कन्धवृक्षः । स च श्लेष्मातकवृक्षः । इति शब्दमाला ॥ (सर्व्वजनतृप्तिप्रदायित्वात् गङ्गा । यथा, काशीखण्डे ।२९।७२।
“तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ॥”
प्रीतिप्रदे, त्रि । यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“क्षुत्तृट्श्रमग्लानिहरी पेया वातानुलोमनी ।
विलेपी तर्पणी हृद्या ग्राहिणी बलवर्द्धिनी ॥”)

तर्पणेच्छुः, पुं, (तर्पणमिच्छतीति । इष + उः निपातनात् साधुः ।) भीष्मः । इति शब्दरत्नावली ॥ तर्पणाकाङ्क्षिणि, त्रि ॥

तर्पिणी, स्त्री, (तर्पयति प्रीणयतीति । तृप् + णिच् + णिनिः । ततो ङीप् ।) पद्मचारिणी । इति शब्दचन्द्रिका ॥

त(र्व्व)र्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) रेफोपधः । तर्बति । इति दुर्गादासः ॥

तर्बटः, पुं, (तर्बति द्रुतं गच्छतीति । तर्ब + बाहुलकात् अटन् ।) वत्सरः । इति शब्दरत्नावली ॥ चक्रमर्द्दः । इति राजनिर्घण्टः ॥

तर्म्म, [न्] क्ली, (तरतीति । तॄ + “सर्व्वधातुभ्यो मनिन् ।” उणां ४ । १४४ । इति मनिन् ।) यूपाग्रम् । इत्यमरः । २ । ७ । १८ ॥

तर्षः, पुं, (तृष पिपासायाम् + भावे घञ् ।) अभिलाषः । (यथा, महाभारते । १२ । २०४ । ६ ।
“तर्षच्छेदो न भवति पुरुषस्येह कल्मषात् ।
निवर्त्तते तदा तर्षः पापमन्तगतं यदा ॥”)
तृष्णा । इत्यमरः । २ । ८ । ५५ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ४८० ।
“लवणार्णवपानेन तर्षौत्कर्षमिवोद्वहन् ।